### आषाढस्य प्रथमदिवसे.....

# विश्वसंस्कृतसम्मेलनम्

26.06.2025

आषाढस्य प्रथमदिवसे काष्ठमण्डपे च प्रवर्तमाने एकोनविंशे विश्वसंस्कृतसम्मेलने अन्ताराष्ट्रियसंस्कृतराजदूतोपाधिना विभूषितस्य केन्द्रीयसंस्कृतविश्वविद्यालयस्य कुलगुरुसहितः बृहत्परिवारः समुपस्थितः। सम्मेलनस्यास्य समुद्घाटनसमारोहे नेपालदेशस्य राष्ट्राध्यक्षाः मन्त्रिणः भारतीयाः अधिकारिणः राजवंशजाः मठाधीशाः यतिवरेण्याः विश्वस्य च विविधदेशजाः संस्कृतबान्धवाः कुलपतिप्रमुखाः आचार्याः शोधार्थिनः इत्येवं सहस्राधिकाः सारस्वताः प्रत्यक्षम् उपस्थिताः इत्येतत् विश्वसम्मेलनस्यास्य वैशिष्ट्यं विज्ञापयति। लक्षाधिकासक्ताः सकौतुकम् अन्तर्जालाश्रितप्रसारवाहिन्याः माध्यमेन समुद्घाटनकार्यक्रममक्षिसात्कर्तुं सफलाः अभूवन्।
बीजाङ्कुरोपमे आद्ये भाषणे संस्कृतकुलाधिपतिना आचार्यश्रीनिवासवरखेडीवर्येण प्रोक्तं यत्-



" संस्कृतं विश्वसंसेव्यं भविष्यं संस्कृताश्रितम् " इति।

पुरा रामगिरितः आषाढस्य प्रथमदिवसे एव मेघसन्देशः सम्प्रेषितः। अधुना हिमालयात् आविश्वं संस्कृतसन्देशं सम्प्रेषयितुं सक्षमाः साम्प्रतिककालिदासाः मत्पुरतः विलसन्ति। पुनश्च एषः अभिनवोत्कर्षस्य सूचकः। पशुपतिनाथसन्निधौ नेपालसंस्कृतगणेशेन आचार्यकाशीनाथवर्येण समायोजितमिदं सम्मेलनं सफलतां यातीति दृढविश्वासः अस्माकं समेषाम्। पशुपतेः पञ्च मुखानि अपि वर्णितानि। पञ्चमुखः महादेवः यथा संसेव्यते तथैव संस्कृतज्ञैः सर्वैः पञ्चमुखी विद्या उपासनीया। पञ्च मुखानि यथा-

१. श्रुतम् – वेदविद्या २. दृष्टम् – दर्शनविद्या ३.मतम्- शास्त्रविद्या ४. प्राप्तम्- प्रातिभविद्या
५. कृतम्- कृत्रिमविद्या




अस्मिन् एकोनविंशे विश्वसंस्कृतसम्मेलने कृत्रिम-विद्या (AI) युगानुकूला ( पञ्चमी विद्या) अस्ति। सैषा संसेव्या।

अकृत्रिमभाषाबलेन कृत्रिमबुद्धेः अनुप्रयोगेण च सारस्वतकार्याणि सुसम्पादनीयानि। श्रेयो भूयात् सकलजनानाम् इति सन्देशं पुनरपि वदन् मनुकुलशान्तिं कामये इति।

तदग्रे अनुग्रहभाषणं विदधानाः श्रीमन्नारायण-चिन्नजीयरस्वामिनः अब्रुवन् यत् एषा गैर्वाणी मृतसञ्जीवनीति। विकासविहायसि विहरन्तो देशाः आङ्ग्लभाषां दूरे संस्थाप्यैव अग्रगामिनोप्यभवन्। चीनादेशः अत्रोदाहरणम्। अधुना भारते भारतीयभाषाः पुनरपि अग्रगामिन्यः सन्ति। ज्ञानविज्ञानयोरुभयोः मूलभाषा संस्कृतभाषा। अतः विकासमूलायाः संस्कृतभाषायाः समाराधनसङ्कल्पः सर्वैरत्र कर्तव्यः। पुनश्च भारतस्य प्रधानमन्त्री नेपालदेशस्य राष्ट्राध्यक्षः इत्युभावपि संस्कृतप्रेमिणौ। अतः उत्कर्षकालघट्टे संस्कृतस्य तद्बलेन च विश्वस्यापि उत्कर्षं शान्तिं वयमत्र भावयामः।

राष्ट्राध्यक्षमहाभागैः उक्तं यत् अद्य संस्कृतभाषा न केवलं भारतनेपालयोः सम्पत्तिः अपि तु समग्रविश्वस्यैव इति। एतद्देशप्रसूतस्य इत्येनं श्लोकमुच्चार्य इतिकर्तव्यता सभामुखं प्रतिपादिता। नेपालीभाषायां भाषामाणास्ते संस्कृतस्य भविष्यं सुन्दरमस्तीति सदृष्टान्तं प्रत्यपादयन्।

सभाध्यक्षा दीप्तित्रिपाठिवर्या सर्वान्ते भाषामाणा अगदत् यत्- संस्कृतसम्मेलनेषु न केवलं संस्कृतज्ञाः अपि संस्कृतविरोधिनः अपि आह्वातव्याः एवेति। अनेन प्रयासेन तेषामपि अज्ञानराशिः अपगच्छति। सम्मेलनदिनान्ते सङ्गीतनृत्यप्रस्तुतयः सारस्वतानां मनोविनोदाय उपकल्पिताः आसन्। एवं विशिष्टोद्घाटनसमारोहः सुसम्पन्नः।

दूरदर्शिनः- **आचार्यः गणेशतिम्मणपण्डितः**
संयुक्तनिदेशकः शैक्षणिकपरियोजना
प्रकाशनानुभागः, नवदेहली।

❖ श्री अश्वनीकुमारः- शोधसहायकः
❖ निशिका पंवार- प्रविधिज्ञा